**MP BOARD CLASS 10 SANSKRIT GENERAL MODEL PAPER SET 7 2020**

म.प्र. बोर्ड कक्षा 10 संस्कृत (सामान्य) मोडल पेपर सेट 7 2020

समय-3 घण्टे पूर्णांक-100

निर्देश:- (i) सर्वे प्रश्नाः अनिवार्यः सन्ति । 1x5=5

(ii) प्रश्नानां सम्मुखे निर्धारिताः अङ्काः प्रदत्ताः।

प्रश्न 1. उचित विकल्पं चित्वा लिखत-

(क) 'महा + औषधिः' इतस्य सन्धिः अस्ति-

(अ) महोषधि (ब) महाऔषधः (स) महौषधिः (द) महैषधिः

(ख) "मनोरथ्" इत्यस्मिन् पदे सन्धि अस्ति

(अ) गुण सन्धिः (ब) स्वर सन्धिः (स) यण् सन्धिः (द) विसर्ग सन्धिः

(ग) "निस् + छलः' इत्यस्य सन्धिः अस्ति-

(अ) निश्छलः (ब) निशछलः (स) निषछलः (द) निश्छलः।

(घ) 'नमः + ते' इत्यस्य सन्धिः अस्ति-

(अ) नमतेः (ब) नमश्ते (स) नमः ते (द) नमस्ते।

(ङ) 'विद्या माता इव रक्षति' इत्यस्मिन् वाक्ये अव्ययम् अस्ति-

(अ) विद्या (ब) माता (स) इव (द) रक्षति।

उत्तर- (क) (स), (ख) (द), (ग) (द), (घ) (द), (ङ) (स)।

प्रश्न 2. उचित विकल्पं चित्वा लिखत-

(क) द्विगु समासस्य उदाहरणम् अस्ति-

(अ) पंचवटी (ब) पीताम्बर (स) चक्रपाणि (द) महादानी।

(ख) अव्ययीभाव समासः नास्ति-

(अ) प्रतिदिनम् (ब) उपकृष्णम् (स) यथाशक्ति (द) असमर्थः

(ग) नञ्तत्पुरुष समासस्य उदाहरणम् अस्ति-

(अ) अब्राह्मणः (ब) सुब्राह्मणः (स) कुब्राह्मणः (द) नरब्राह्मणः।

(घ) 'राज पुरुषः' इत्यस्मिन् पदे समासः अस्ति-

(अ) द्वितीय तत्पुरुषः (ब) चतुर्थी तत्पुरुष (स) पञ्चमी तत्पुरुष (द) षष्ठी तत्पुरुष।

(ङ) 'अधिकारः' इत्यस्मिन् पदे उपसर्गः अस्ति-

(अ) अपि (ब) अति (स) अधि (द) अभि।

उत्तर- (क) (अ), (ख) (द), (ग) (अ), (घ) (द), (ङ) (स)।

प्रश्न 3. उचित विकल्पं चित्वा लिखत-

(क) पठेयुः इत्यस्मिन् पदे लकारः अस्ति-

(अ) लट्लकार: (ब) लोट्लकारः (स) लङ्लकारः (द) विधि लिङ्लकारः।

(ख) 'लभते' इत्यस्मिन् पदे वचनम् अस्ति-

(अ) एकवचनम् (ब) द्विवचनम् (स) बहुवचनम्।

(ग) 'पास्यति' इत्यस्मिन् पदे धातु अस्ति-

(अ) पिब् (ब) पिस् (स) पास् (द) पास्य।

(घ) 'पचामः' इत्यस्मिन् पदे पुरुषः अस्ति-

(अ) प्रथम पुरुषः (ब) उत्तम पुरुषः (स) मध्यम पुरुषः (द) महापुरुषः।

(ङ) अधोलिखितेषु अव्ययम् नास्ति-

(अ) इव (ब) अद्य (स) बालकः (द) शनैः।

उत्तर- (क) (द), (ख) (अ), (ग) (अ), (घ) (ब), (ङ) (द)।

प्रश्न-4. उचित विकल्पं चित्वा लिखत

(क) "श्रुत्वा" इत्यस्मिन् पदे प्रत्ययः अस्ति-

(अ) क्त (ब) क्तवतु (स) क्त्वा (द) क्तिन्।

(ख) 'क्तवतु' प्रत्ययस्योदाहरणमस्ति-

(अ) गुणवान् (ब) लिखितवान् (स) दर्शनीयम् (द) कम्पमानः।

(ग) 'ल्यप् प्रत्ययस्य उदाहरणम् अस्ति-

(अ) आगत्य (ब) आगम (स) आयत (द) आतप।

(घ) 'वर्तमान्' इत्यस्मिन् पदे प्रत्ययः अस्ति-

(अ) तुमुन् (ब) क्त्वा (स) शानच् (द) शतृ।

(ङ) "सदाचार एव परमोधर्म:" अस्मिन् वाक्ये अव्ययम् अस्ति-

(अ) परम् (ब) एव (स) सदाचारः (द) धर्मः।

उत्तर- (क) (स), (ख) (ब), (ग) (अ), (घ) (स), (ङ) (ब)।

प्रश्न 5. प्रदत्तैः शब्दैः रिक्त स्थान पूर्ति कुरुत (कोऽपि पञ्च)-

(सत्ये, श्रेष्ठः, सूर्यदेवः, सप्तहोता, लघुत्वं, मनः)।

(क) सर्व ............. प्रतिष्ठितम्।

(ख) ........... प्रकाशं प्रयच्छति।

(ग) येन यज्ञस्तायते ............।

(घ) ज्येष्ठः ............ कुले लोके।

(ङ) परसदन निविष्टः को ............. न याति।

(च) तन्मे ........... शिवसंङ्कल्पमस्तु।

उत्तर- (क) सत्ये, (ख) सूर्यदेवः, (ग) सप्तहोता, (घ) श्रेष्ठः, (ङलघुत्वं, (च) मनः।

प्रश्न 6. अधोलिखित प्रश्नानाम् उत्तराणि एकवाक्येन लिखत (कानि त्रीणि)

1. अस्माभिः का वर्धनीया?

2. केषां कृते महोदधिः अपरो नास्ति ?

3. घटोत्कचः अन्ते किं कथयति ?

4. संस्कृतभाषा कस्य पोषणं करोति ?

5. रथकारः पर्वतदेशे किमर्थं गतः?

6. वर्षाकाले के प्रशान्ताः भवति?

प्रश्न 7. अधोलिखितेषु द्वयोः शब्दयोः शब्दरूपाणि त्रिषु वचनेषु लिखत-

1. राम षष्ठी - विभक्तिः

2. राजन् तृतीया - विभक्तिः

3. अस्मद् - प्रथमा विभक्तिः

प्रश्न 8. 'तेन' अथवा 'पितरः' इति पदस्य विभक्तिं वचनं च लिखत।

प्रश्न 9. अधोलिखितेषु गद्यांशेषु गद्यांशद्वयस्य प्रश्नानाम् उत्तराणि संस्कृतभाषायाम् लिखत-

(क) सूर्यवंशस्य राजा सगरः आसीत्।सः एकदा अश्वमेधयागंकृतवान्।यागस्य अन्ते यागस्य अश्वः यत्र-तत्र सञ्चारं कृतवान्। अश्वमेधं कृत्वा सगरः स्वयम् इन्द्रः भविष्यति इति देवेन्द्रस्य असूया आसीत्। तस्मात् सः यागस्य विजं कर्तुमार्गचिन्तितवान्। ततः अश्वं गृहीत्वा पातालोके कपिलमुनेः पुरतः स्थापितवान्। तदा मुनिः तपः कुर्वन् ध्याने आसीत्। अतः सः किमपि न ज्ञातवान्।

प्रश्नाः-1. सूर्यवंशस्य राजा कः आसीत् ?

2. सः एकदा किं कृतवान् ?

3. यागस्य अश्वः कुत्र सञ्चारं कृतवान्।

4. कः यागस्य विघ्नं कर्तुं मार्ग चिन्तितवान् ?

5. इन्द्रः अश्वं गृहीत्वा पाताललोके कस्य पुरतः स्थापितवान् ?

(ख) ततः वासुदेवः रामनाथपुरं प्राप्य रामदेवस्य गृहम् अगच्छत्। पणः निर्मितं गृहं तत्। कश्चन् युवकः तं सादरं स्वागतीकृत्य पानीय भोजनादिभिः तं सत्कृत्य विश्रान्त्यर्थ व्यवस्थाम् अकरोत्। विश्रान्तेः अनन्तरं सः "अहं रामदेवस्य पुत्रः" इति स्वपरिचयम् उक्त्वा आगमन कारणम् अपृच्छत्।

प्रश्नाः -1. वासुदेवः कस्य गृहम् अगच्छत् ?

2. तत् गृहम् कीदृशम् ?

3. युवकः स्वपरिचयं किं दत्तवान् ?

4. युवकः वासुदेवं किं अपृच्छत् ?

5. "वासुदेवः" इत्यस्यं पदस्य विभक्तिवचनञ्च लिखत।

(ग) प्रकृतिरपि समयस्य पालनं कार्यपरायणताम्, एव उपदिशति निरन्तरम् प्रकृतौ यावन्तः पदार्थाः सृष्टाः सन्ति ते सर्वेऽपि अहोरात्रं कार्य संलग्ना एव दृश्यन्ते। सूर्य चन्द्राभ्याम्, आरभ्य कीटपतङ्गपिपीलिका पर्यन्त सर्वेऽपि स्व-स्व व्यापारे व्यापृताः विलोक्यन्ते। अतः प्रकृत्या अपि यत् नहि केनापि समयस्य अनुपयोगः कर्त्तव्यः इति।

प्रश्नाः-1. प्रकृतिरपि किं उपदिशति ?

2. प्रकृतौ यावन्तः पदार्थाः सृष्टाः संति ते अहोरात्रं कस्मिन् संलग्ना एव दृश्यन्ते ?

3. सर्वेऽपि कस्मिन् व्यापताः विलोक्यन्ते?

4. कया समयस्य पालनमेव शिक्षा दीयते?

5. कस्य अनुपयोगः न कर्त्तव्यः? http://www.mpboardonline.com

प्रश्न 10. अधोलिखितेषु पद्यांशेषु पद्यांश द्वयस्य प्रश्नानाम् उत्तराणि संस्कृतभाषायां लिखत-

(क) दानेन भूतानि वशीभवन्ति दानेन वैराण्यपि यान्ति नाशम्।

परोऽपि बन्धुत्वभूपैति दानैर्दानं हि सर्व व्यसनानि हन्ति।।

प्रश्नाः-1. भूतानि केन वशीभवन्ति ?

2. दानेन कानि नाशम् यान्ति ?

3. दानैः कः बन्धुत्वभूपैति ?

4. दानं कानि हन्ति ?

5. परोऽपि इति पदस्य सन्धिविच्छेदं कृत्वा नाम लिखत।

(ख) वहन्ति वर्षन्ति नदन्ति भान्ति

ध्यायन्ति नृत्यन्ति समाश्वसन्ति।

नद्यो घना मत्तगजाः वनान्ताः

प्रियाविहीनाः शिखिनः प्लवङ्गमाः॥

प्रश्नाः-1. काः वहन्ति ?

2. के वर्षन्ति ?

3. मत्तगजाः किं कुर्वन्ति ?

4. के नृत्यन्ति?

5. 'ध्यायन्ति' इति शब्दाय धातुः लकारः पुरुषः वचनश्च लिखत।

(ग) मनसा चिन्तितं कार्य वाचा नैव प्रकाशयेत्।

मन्त्रेण रक्षयेद् गढ़ कार्ये चाऽपि नियोजयेत्।।

प्रश्नाः-1. कार्य कया चिन्तितम् ?

2. वाचा किं न प्रकाशयेत् ?

3. गूढं केन रक्षयेत्।

4. कार्ये किं नियोजयेत् ?

5. "रक्षयेत् इति' शब्दस्य धातुः लकारः पुरुषः च लिखत ।

प्रश्न 11. युग्ममेलनं कुरुत (कोऽपि चत्वारः)

| 'अ' | 'ब' |
|---|---|
| 1. सर्पाः | (क) मदो मे व्यपगतः |
| 2. ज्वर इव, | (ख) शिष्यः |
| 3. जर्जरम् | (ग) वल्मीकेषु |
| 4. वासुदेवः | (घ) शरीरम् |

(ङ) प्रार्थना।

उत्तर- 1.(ग), 2. (क), 3. (घ), 4.(ब)।

प्रश्न 12. शुद्धवाक्यानां समक्षं "आम्" अशद्धवाक्यानां समक्षं 'न' इति लिखत

1. वृक्षच्छेदकः वृक्षं खण्डशः कृतवान्।

2. घटोत्कचः जनन्या आज्ञप्तः।

3. शुद्धोदनः राहुलस्य पिता आसीत्।

4. यत् महाभारते अस्ति तदन्यत्र नास्ति।

उत्तर- 1. न, 2. आम्, 3. न्, 4. न्।

प्रश्न 13. अधोलिखितेषु प्रश्नेषु चतुर्णां प्रश्नानाम् उत्तराणि संस्कृतभाषायाम् एकपदेन लिखत-

1. कस्य वंशे भगीरथस्य जननम् अभवत् ?

2. जनाः समयस्य दुरुपयोग कतिधा कुर्वन्ति ?

3. 'महाभारतस्य प्रणयनं केन कृतम् ?

4. वर्षाकाले के भान्ति ?

5. का रूपं नाशयिष्यति?

6. भारतस्य पुरातनः सखा कः विद्यते ?

प्रश्न 14. प्रश्नपत्रे समागतान् श्लोकान् विहाय स्वपाठ्यपुस्तकस्य सुभाषित् द्वयं लिखत।

प्रश्न 15. स्वस्य प्राचार्यस्य कृते अवकाशार्थम् एकं प्रार्थना पत्रं संस्कृते लिखत।

अथवा, http://www.mpboardonline.com

स्वस्य मित्रस्य कृते नववर्षस्य अभिनंदनपत्रम् संस्कृते लिखत।

प्रश्न 16. अधोलिखितेषु "पञ्च" अशुद्धकारक वाक्यानाम् शुद्धि करणीया

1. मम दुग्धं रोचते।

2. सीता रामस्य सह वनं गता।

3. मम जननी भोजनं पचन्ति।

4. वृक्षेण पत्राणि पतन्ति।

5. भवान् कुत्र पश्यसि।

6. श्री गणेशं नमः।

प्रश्न 17. अधोलिखित वाक्यानां कथानुसारेण क्रमसंयोजनं कुरुत-

1. ग्रामे एकः प्राचीनः विशालः न्यग्रोधवृक्षः आसीत्।

2. इदं मदीयः वृक्षः इति काकस्य ध्वनि अंतरिक्षं अस्पृश्यत्।

3. तस्य शाखायाम् एकः काकः वसन्नासीत्।

4. अहम् अस्मिन् चिरात् वसामि। 5. हे बन्धवः श्रूयतां मे वचः।

प्रश्न 18. अधोलिखितम् अपठितं गद्यांशं सम्यक् पठित्वा प्रश्नानाम् उत्तराणि संस्कृतभाषायां लिखत-

सतां सज्जनानां, सङ्गतिः सम्पर्कः संसर्गो वा सत्सङ्गतिः इति कथ्यते। वस्तुतः सत्सङ्गात् एव मानवः समुन्नतो भवति। सज्जनानां संसर्गेण च जनः सज्जनः भवति, दुर्जनानां संसर्गेण च दुर्जनः भवति। स्थाने एवोक्तं "संसर्गजा दोषगुणा भवन्ति" इति। अतः स्वसमुन्नतिं इच्छता जनेन सर्वदा सतामेव सङ्गतिः विधेया।

प्रश्नाः-1. अस्य गद्यांशस्य शीर्षकं लिखत।

2. स्वसमुन्नतिम् इच्छता जनेन किं करणीयम?

3. गद्यांशस्यास्य सारं लिखत।

4. दुर्जनः शब्दस्य विलोमशब्दं लिखत।

5. केन जनः सज्जनः भवति ?

प्रश्न 19. अधोलिखितेषु एकं विषयं स्वीकृत्य शतशब्देषु संस्कृतभाषायाम् निबन्धं लिखत-

1. सदाचारः, 2. विद्या-महिमा, 3. महाकविः कालिदास, 4. उत्सवः ।